# CBSE Test Paper 03
## Ch-10 प्राणेभ्योऽपि प्रियः सुहृत्

1. **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**
   चाणक्यः - अयमीदृशो विरोधः यत् त्वमद्यापि राजापथ्यकारिणोऽमात्यराक्षसस्य गृहजनं स्वगृहे रक्षसि।
   चन्दनदासः - आर्य। अलीकमेतत्। केनाप्यनार्येण आर्याय निवेदितम्
   चाणक्यः - भो श्रेष्ठिन्! अलमाशङ्कया। भीताः पूर्वराजपुरुषाः पौराणामिच्छतामपि गृहेषु गृहजनं निक्षिप्य देशान्तरं व्रजन्ति। ततस्तत्प्रच्छादनं दोषमुत्पादयति।
   चन्दनदासः - एवं नु इदम्। तस्मिन् समये आसीदस्मद्गृहे अमात्यराक्षसस्य गृहजन इति।
   चाणक्यः - पूर्वम् ‘अनृतम्', इदानीम् "आसीत्" इति परस्परविरुद्धे वचने।
   चन्दनदासः - आर्य! तस्मिन् समये आसीदस्मद्गृहे अमात्यराक्षसस्य गृहजन इति।

   I. **एकपदेन उत्तरत-**
      i. चन्दनदासः कस्य गृहजनं स्वगृहे रक्षति?
      ii. कीदृशेन अपर्याय निवेदितम्?
   II. **पूर्णवाक्येन उत्तरत-**
      i. कीदृशाः जनाः गृहजनं निक्षिप्य देशान्तरं व्रजन्ति?
   III. **भाषिककार्यम्-**
      i. 'नगरवासिनाम्' इत्यर्थे किं पदं प्रयुक्तम्?
         (क) पौराणाम्
         (ख) पौराणमिच्छता
         (ग) भीताः
         (घ) राजपुरुषाः
      ii. 'अनृतम्' इतिपदस्य पर्यायपदं किं प्रयुक्तम्?
         (क) अनार्यम्
         (ख) अलीकम्
         (ग) एतत्
         (घ) अलीकमेतत्
      iii. अस्मिन् नाट्यांशे परस्पर विरुद्धे वचने के स्तः?
         (क) अनृतम-आसीत्
         (ख) पूर्वम्-इदानीम्
         (ग) पूर्वम्-अनृतम्
         (घ) इदानीम्-आसीत्

2. **अधोलिखितानि वाक्यानि घटनाक्रमानुसारेण योजयत-**

i. आर्यस्य प्रसादेन तस्य वणिज्या अखण्डिता अस्ति।
ii. चाणक्य चन्दनदासम् द्रष्टुम् इच्छति।
iii. कः पुनः अधन्यः राज्ञः विरुद्धः आर्येण अवगम्यते।
iv. सन्तमपि गेहे अमात्य राक्षसस्य गृहजनं न समर्पयामि।
v. अमात्य राक्षसस्य गृहजनं स्वगृहे रक्षसि।
vi. शिष्यः चन्दनदासेन सह प्रविशति।
vii. परसंवेदने अर्थलाभेषु सुलभेषु जने इदं दुष्करं कार्यं कृतम्।
viii. अलीकमेतत्! अनार्येण आर्याय निवेदितम्।

3. **स्थूलपदमाधृत्य प्रश्ननिर्माणं कुरुत-**

i. **चन्दनदासेन** सह शिष्यः प्रवेशं करोति।
ii. आर्यस्य प्रसादेन **अखण्डिता** मे वाणिज्या।
iii. **आर्यस्य** जयः भवतु।
iv. **इदानीम्** चन्दनदासम् द्रष्टुम् इच्छामि।

4. **अधोलिखित श्लोकानाम् भावर्थम् मञ्जूषायाः सहायतया उचित-क्रमेण पूरयत्।**

सुलभेष्वर्थलाभेषु परसंवेदने जने।
क इदं दुष्करं कुर्यादिदानीं शिविना विना।।

**भावार्थः-** परकीयस्य वस्तुनः (i)________ कृते सति अर्थलाभे सुलभे सत्यपि स्वार्थं (ii)_________ परेषां संरक्षणरूपं दुष्करं कर्म अस्मिन् (iii)__________ महाराजं (iv)_________ बिना कः करिष्यति?

| |
|---|
| **मञ्जूषा-** संसारे, परित्यज्य, शिविं, समर्पणे |

## CBSE Test Paper 03

## Ch-10 प्राणेभ्योऽपि प्रियः सुहृत्

### Answer

1. I. (i) अमात्यराक्षसस्य
   (ii) अनार्येण
   II. (i) भीताः पूर्वराजपुरुषाः पौराणामिच्छतामपि गृहेषु गृहजनं निक्षिप्य देशान्तरं व्रजन्ति।
   III. (i) (क) पौराणाम्
   (ii) (ख) अलीकम्
   (iii) (घ) इदीनीम्-आसीत्
2. i. चाणक्य चन्दनदासम् द्रष्टुम् इच्छति।
   ii. शिष्यः चन्दनदासेन सत प्रविशति।
   iii. आर्यस्य प्रसादेन तस्य वाणिज्या अखण्डिता अस्ति।
   iv. कः पुनः अधन्यः राजः विरुद्धः आर्येण अवगम्यते।
   v. अमात्य राक्षसस्य गृहजनं स्वगृहे रक्षसि।
   vi. अलीकमेतत्! अनार्येण अर्याय निवेदितम्।
   vii. सन्तमपि गेहे अमात्य राक्षसस्य गृहजनं न समर्णयामि।
   viii. परसंवेदने अर्थलाभेषु सुलभेषु जने इदं दुष्करं कार्यं कृतम्।
3. i. केन, ii. कीदृशी, iii. कस्य, iv. कदा
4. i. समर्पणे, ii. परित्यज्य, iii. संसारे, iv. शिविं